# ShrI Vishnu Panchayudha Stotram

# શ્રીવિષ્ણુ પઞ્ચાયુધસ્તોત્રમ્

## Document Information

Text title : viShNu panchAyudha stotram

File name : vishnupanchAyudh.itx

Category : vishhnu, stotra, vishnu

Location : doc_vishhnu

Author : Traditional

Proofread by : Arun Shantharam shantharam.arun at gmail.com

Latest update : September 13, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 13, 2020

*sanskritdocuments.org*

## ShrI Vishnu Panchayudha Stotram

# શ્રીવિષ્ણુ પઞ્ચાયુધસ્તોત્રમ્

સ્ફુરત્સહસ્રારશિખાતિતીવ્રં સુદર્શનં ભાસ્કરકોટિતુલ્યમ્ ।
સુરદ્વિષાં પ્રાણવિનાશિ વિષ્ણોશ્ચક્રં સદાઽહં શરણં પ્રપદ્યે ॥ ૧॥

વિષ્ણોર્મુખોત્થાનિલપૂરિતસ્ય યસ્ય ધ્વનિર્દાનવદર્પહન્તા ।
તં પાઞ્ચજન્યં શશિકોટિશુભ્રં શઙ્ખં સદાઽહં શરણં પ્રપદ્યે ॥ ૨॥

હિરણ્મયીં મેરુસમાનસારાં કૌમોદકીં દૈત્યકુલૈકહન્ત્રીમ્ ।
વૈકુણ્ઠવામાગ્રકરાભિમૃષ્ટાં ગદાં સદાઽહં શરણં પ્રપદ્યે ॥ ૩॥

રક્ષોઽસુરાણાં કઠિનોગ્રકણ્ઠચ્છેદક્ષરચ્છોણિતદિગ્ધધારામ્ ।
તં નન્દકં નામ હરેઃ પ્રદીપ્તં ખડ્ગં સદાઽહં શરણં પ્રપદ્યે ॥ ૪॥

યજ્જ્યાનિનાદશ્રવણાત્સુરાણાં ચેતાંસિ નિર્મુક્તભયાનિ સદ્યઃ ।
ભવન્તિ દૈત્યાશનિબાણવર્ષિઃ શાર્ઙ્ગં સદાઽહં શરણં પ્રપદ્યે ॥ ૫॥

ઇમં હરેઃ પઞ્ચમહાયુધાનાં સ્તવં પઠેદ્યોઽનુદિનં પ્રભાતે । var પઠેદ્યોસુદિનં
સમસ્તદુઃખાનિ ભયાનિ સદ્યઃ પાપાનિ નશ્યન્તિ સુખાનિ સન્તિ ॥ ૬॥

વનેરણે શત્રુજલાગ્નિમધ્યે યદૃચ્છયાપત્સુ મહાભયેષુ ।
ઇદં પઠન્ સ્તોત્રમનાકુલાત્મા સુખી ભવેત્તત્કૃતસર્વરક્ષઃ ॥ ૭॥

યચ્ચક્રશઙ્ખં ગદખડ્ગશાર્ઙ્ગિણં
        પીતામ્બરં કૌસ્તુભવત્સલાઞ્છિતમ્ ।
શ્રિયા સમેતોજ્જ્વલશોભિતાઙ્ગં
        વિષ્ણું સદાઽહં શરણં પ્રપદ્યે ॥ ૮॥

જલે રક્ષતુ વારાહઃ સ્થલેરક્ષતુ વામનઃ ।
અટવ્યાં નારસિંહશ્ચ સર્વતઃ પાતુ કેશવઃ ॥

ઇતિ શ્રીવિષ્ણુ પઞ્ચાયુધસ્તોત્રમ્ ।

*ShrI Vishnu Panchayudha Stotram*

pdf was typeset on September 13, 2020

Please send corrections to *sanskrit@cheerful.com*